# ॥ श्रीअष्टलक्ष्मीमन्त्रसिद्धिविधानम् ॥

.. shrIaShTalakShmImantrasiddhividhAnam ..

sanskritdocuments.org

May 21, 2017

# .. shrIaShTalakShmImantrasiddhividhAnam ..

# ॥ श्रीअष्टलक्ष्मीमन्त्रसिद्धिविधानम् ॥

## Sanskrit Document Information

Text title : aShTalakShmImantrasiddhividhAnam

File name : aShTalakShmImantrasiddhividhAnam.itx

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : shrIlakShmIkaTAkSha S K Rajagopalan 2001 collection of Laxmistotras

Latest update : May 5, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 21, 2017

*sanskritdocuments.org*

# ॥ श्रीअष्टलक्ष्मीमन्त्रसिद्धिविधानम् ॥

आदौ श्रीरमानाथध्यानं
श्रीवत्सवक्षसं विष्णुं चक्रशङ्खसमन्वितम् ।
वामोरुविलसल्लक्ष्म्याऽऽलिङ्गितं पीतवाससम् ॥

सुस्थिरं दक्षिणं पादं वामपादं तु कुञ्चितम् ।
दक्षिणं हस्तमभयं वामं चालिङ्गितश्रियम् ॥

शिखिपीताम्बरधरं हेमयज्ञोपवीतिनम् ।
एवं ध्यायेद्रमानाथं पश्चात्पूजां समाचरेत् ॥

ऋषिः - छन्दः - देवता - विनियोगः
अस्य श्रीअष्टलक्ष्मीमहामन्त्रस्य - दक्षप्रजापतिः ऋषिः -
गायत्री छन्दः - महालक्ष्मीर्देवता - श्रीं बीजं - ह्रीं शक्तिः -
नमः कीलकं - श्रीमहालक्ष्मीप्रसादेन अष्टैश्वर्यप्राप्तिद्वारा
मनोवाक्कायसिद्ध्यर्थे जपे विनियोगः ॥

करन्यासः
श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं अङ्गुष्ठाभ्यां नमः ।
श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं तर्जनीभ्यां नम ॥

श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं मध्यमाभ्यां नमः ।
श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं अनामिकाभ्यां नमः ।
श्रीं ह्रीं श्रीं महालक्ष्म्यै श्रीं ह्रीं श्रीं कनिष्ठिकाभ्यां नमः ।
श्रीं ह्रीं श्रीं नमः श्रीं ह्रीं श्रीं करतलकरपृष्ठाभ्यां नमः ॥

हृदयादि न्यासः
श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं हृदयाय नमः ।
श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं शिरसे स्वाहा ।
श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं शिखायै वषट् ।
श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं कवचाय हुम् ।
श्रीं ह्रीं श्रीं महालक्ष्म्यै श्रीं ह्रीं श्रीं नेत्रत्रयाय वौषट् ।
श्रीं ह्रीं श्रीं नमः श्रीं ह्रीं श्रीं अस्त्राय फट् ।
भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम् -
वन्दे लक्ष्मीं वरशशिमयीं शुद्धजाम्बूनदाभां
तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलाङ्गीम् ।
बीजापूरं कनककलशं हेमपद्मे दधानां
आद्यां शक्तिं सकलजननीं विष्णुवामाङ्कसंस्थाम् ॥

पूजा
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
लं पृथ्वीतत्त्वात्मकं गन्धं समर्पयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
हं आकाशतत्त्वात्मकं पुष्पं समर्पयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
यं वायुतत्त्वात्मकं धूपमाघ्रापयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
रं वह्नितत्त्वात्मकं दीपं दर्शयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
वं अमृततत्त्वात्मकं नैवेद्यं समर्पयामि नमः ।
ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै महालक्ष्म्यै ॐ -
सं सर्वतत्त्वात्मकं सर्वोपचारपूजां समर्पयामि नमः ।
अष्टनामार्चना
ॐ आदिलक्ष्म्यै नमः । ॐ सन्तानलक्ष्म्यै नमः ।
ॐ गजलक्ष्म्यै नमः । ॐ धनलक्ष्म्यै नमः ।
ॐ धान्यलक्ष्म्यै नमः । ॐ विजयलक्ष्म्यै नमः ।
ॐ वीरलक्ष्म्यै नमः । ॐ ऐश्वर्यलक्ष्म्यै नमः ।
षोडश मातृकार्चना
अं कामाकर्षिण्यै नमः । आं बुद्ध्याकर्षिण्यै नमः ।
इं अहङ्काराकर्षिण्यै नमः । ईं शब्दाकर्षिण्यै नमः ।
उं स्पर्शाकर्षिण्यै नमः । ऊं रूपाकर्षिण्यै नमः ।
ऋं रसाकर्षिण्यै नमः । ॠं गन्धाकर्षिण्यै नमः ।
ऌं चित्ताकर्षिण्यै नमः । ॡं धैर्याकर्षिण्यै नमः ।
एं स्मृत्याकर्षिण्ये नमः । ऐं नामाकर्षिण्ये नमः ।
ॐ बीजाकर्षिण्ये नमः । औं आत्माकर्षिण्ये नमः ।

अं अमृताकर्षिण्ये नमः । अः शरीराकर्षिण्यै नमः ।
कुम्भादि कुम्भगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा ॥

जपप्रकारम्
गुरु प्रार्थना - ॐ नमः श्रीगुरुदेवाय परमपुरुषाय नमः ।
अष्टैश्वर्यलक्ष्मी देवताः ।
वशीकराय सर्वारिष्टविनाशनाय त्रैलोक्यवशायै स्वाहा ॥

मूलमन्त्रम् ।
१ ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद
श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः ।
२ ॐ श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै स्वाहा ।
३ ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्ये सिम्हवाहिन्यै स्वाहा ।
वैदिकमन्त्रम्
महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

महालक्ष्मि नमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि ।
हरिप्रिये नमस्तुभ्यं नमस्तुभ्यं दयानिधे ॥

पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
सान्निध्यं कुरु मे चित्ते विष्णुवक्षस्थलालये ॥

भगवद्दक्षिणे पार्श्वे ध्यायेच्छ्रियमवस्थिताम् ।
ईश्वरीं सर्वभूतानां जननीं सर्वदेहिनाम् ॥

इति श्रीअष्टलक्ष्मीमन्त्रसिद्धिविधानं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIaShTalakShmImantrasiddhividhAnam ..
was typeset using XƎLaTeX 0.99996
on May 21, 2017

Please send corrections to *sanskrit@cheerful.com*